# DHARMABINDU

A WORK ON JAINA PHILOSOPHY

BY

HARIBHADRA

WITH THE COMMENTARY OF MUNICANDRA

EDITED BY

LUIGI SUALI

PARTLY REVISED AND SEEN THROUGH THE PRESS BY

CHINTAHARAN CHAKRAVARTI

PRINTED AT THE BAPTIST MISSION PRESS

PUBLISHED BY THE ROYAL ASIATIC SOCIETY OF BENGAL

CALCUTTA

1940

## PREFACE

Dr. Luigi Suali of Bologna (Italy) who edited the *Saddarasana Samuccaya* of Haribhadrasuri for the Society in the Bibliotheca Indica Series was entrusted in 1908 with the work of editing the *Dharmabindu* of the same author with Municandra's commentary. The Sanskrit text of the entire work prepared by Dr. Suali was received by the Society from him and the first fascicle comprising pp. 1–80 was printed in 1912. During the following eight years no further progress was made, but in 1921 the work was resumed and pages 113–160 were sent to the press and Dr. Suali corrected them up to the stage of page-proof. There was a hiatus again in the progress of the work for which no apparent reason can be assigned. In 1939 when the re-organization of the work of the Society was taken in hand and publication of all works that were lying incomplete was undertaken—all efforts to get in touch with Dr. Suali having failed—Prof. Chintaharan Chakravarti was entrusted by the Council with the task of seeing the materials left by Dr. Suali through the press and bringing the long delayed work to completion.

In the absence of the Sanskrit text, published for the first time by Dr. Suali in the *Giornale della Societa Asiatica Italiana* with Italian translation (Vol. 21, pp. 223 ff.), it was not possible to check the press copy left by Dr. Suali with the printed Sanskrit text and ascertain how it was prepared. From the footnotes where variants have been recorded, it appears that Dr. Suali's text was made from four different MSS. though no details are available as regards the latter. Prof. Chakravarti has, however, been able to compare the text, now printed, with a MS. of the work in the possession of the Society, and a printed edition recently published from Ahmedabad. In addition, he has given a short introduction, a table of contents and a list of important words occurring in the work.

It is hoped that the work, which is an important document of Jaina philosophy now published in a completed form after thirty years from the time of its inception, and unhappily not fully seen through the press by the distinguished editor, will, nevertheless, serve to satisfy a keenly-felt want of students of Indian and specially of Jaina philosophy and doctrine of life.

B. S. Guha,
*General Secretary,*
*Royal Asiatic Society of Bengal.*

1, Park Street,
*December* 19, 1940.

# INTRODUCTION

The *Dharmabindu* of Haribhadra is an important Jaina work on the rules of life of both the layman and the ascetic. Incidentally it gives the Jaina view of the *summum bonum* of life.

The work appears to have been published for the first time with an Italian translation by Dr. Suali,[1] the editor of the present work, in the pages of the *Giornala della Societa Asiatica Italiana* (Vol. 21, pp. 223 ff.).[2] Though the present edition was undertaken as far back as the year 1908 and one fascicle was issued in 1912, the complete edition with the commentary of Municandra now published, cannot lay claim to its being published for the first time in this country, as an edition in the orthodox style in what is called *Pothi* form (with loose leaves) from Ahmedabad (inadvertently referred to as Surat in the footnotes of pages 236 and 237) was published in 1924. The Ahmedabad edition does not refer to the already published fascicle of the Bibliotheca Indica edition or to any manuscripts on which the edition is based. It has three indices:—

(1) List of the sūtras arranged serially.
(2) List of the sūtras arranged alphabetically.
(3) Alphabetical list of verses quoted in the commentary.

The present edition is based on five manuscripts, of which no details are known, collated by Dr. Suali (indicated as A, B, C, D, and P) and one manuscript belonging to the Royal Asiatic Society of Bengal [3] (indicated as R) and collated by the undersigned who also compared the Ahmedabad edition for the portion of the work published under his supervision.

It is of interest to note that very few important variants were noticed either in the manuscript or the Ahmedabad edition.

---

[1] Dr. Suali, it appears, made a special study of the works of Haribhadra and edited and translated a number of them (Winternitz—*History of Indian Literature*, Calcutta University, Vol. II, pp. 583-4).

[2] Unfortunately, the *Giornale* was not available in Calcutta. Neither was it possible to get a copy from abroad. So the text published in it could not be consulted and compared for the concluding part of the present edition seen through the press by me.

[3] This MS (No. 3054 of the Government collection) is of country-made paper written in Devanagari characters and complete in 94 Folia (10 × 4½ inches). It is written neatly and correctly, though there are occasional omissions (corrected in the margin) and transpositions. The original owner of the MS. was one Pandit Dayācanda whose name is recorded at the end ( । पं। दयाचंदकस्येदम् । )

It is also curious that none of the MSS. seems to contain the name of the author.

It is to be mentioned that the present edition differs from the Ahmedabad one in the numbering of and reckoning of the extent of the individual sūtras. The latter does not count as sūtras the verses occurring at the beginning and end of each chapter and they are distinguished from the sūtras by a separate numbering. Also the word *iti* occurring at the end of each sūtra is taken in it to be a part of the sūtra itself while in the present edition it has been systematically separated from the sūtras. The same remark applies to introductory words like *tathā*. Attention has been drawn to two instances of the latter type in the footnotes on pages 236 and 237.

As regards auxiliary matters a list of contents and a glossary of peculiar terms used in the sūtras have been added.

CHINTAHARAN CHAKRAVARTI.

BETHUNE COLLEGE,
CALCUTTA.
*December* 19, 1940.

नन्वेवमन्यायेन व्यवहारप्रतिषेधे गृहस्थस्य[1] वित्तप्राप्तिरेव न भविष्यति; तत्कथं निर्वाहव्यवच्छेदे धर्महेतुश्चित्तसमाधिलाभः स्यादित्याशङ्क्याह।

**न्याय एव ह्यर्थाप्त्युपनिषत्परेति समयविदः॥ ११॥**

इति॥ न्याय एव न पुनरन्यायो ऽप्यर्थस्य विभवस्याप्तिर्लाभोऽर्थाप्तिः। तस्या उपनिषत्। अत्यन्तरहस्यभूत उपायो युक्तायुक्तार्थसार्थविभागकलनकौशलविकलैः स्थूलमतिभिः स्वप्रायमानावस्थायामप्यनुपलब्ध इति यो ऽर्थः। परा प्रकृष्टा। इत्येवम्[2]। समयविदः सदाचाराभिधायिशास्त्रज्ञा ब्रुवते। तथाहि ते पठन्ति।

'निपानमिव मण्डूकाः सरः पूर्णमिवाण्डजाः।
शुभकर्माणमायान्ति विवशाः सर्वसंपदः॥ १॥

तथा।

नोदन्वानर्थितामेति न चाम्भोभिर्न पूर्यते।
आत्मा तु पात्रतां[3] नेयः[3] पात्रमायान्ति संपदः॥ २॥

कुत एतदेवमित्याह।

**ततो हि नियमतः प्रतिबन्धककर्मविगमः॥ १२॥**

इति॥ ततो न्यायात्मकाशाद्धुर्यस्मान्नियमतोऽवश्यंभावेन प्रतिबन्धकस्य परलाभोपघातजननद्वारेण भवान्तर उपात्तस्य

१ C गृहस्थवित्त०। २ BC इत्येव। ३ B omits.

लाभविघ्नहेतोः कर्मणो लाभान्तरायलक्षणस्य विगमो[१] विनाशः संपद्यते यथा सम्यक्प्रयुक्ताया लङ्घनादिक्रियायाः सकाशाद्रोगस्य ज्वरातिसारादेरिति ।

ततोऽपि किं सिद्धमित्याह ।

**सत्यस्मिन्नायत्यामर्थसिद्धिः ॥ १३ ॥**

इति ॥ सति विद्यमानेऽस्मिन्नान्तरे प्रतिबन्धककर्मविगम आयत्यामागामिनि काले ऽर्थसिद्धिरभिलषितविभवनिष्पत्तिराविर्भवतीति ॥

एतद्विपर्यये दोषमाह ।

**अतोऽन्यथापि प्रवृत्तौ पाक्षिकोऽर्थलाभो निःसंशयस्त्वनर्थः ॥ १४ ॥**

इति ॥ अत उक्तलक्षणान्न्यायादन्यथाप्यन्यायलक्षणेन प्रकारेण प्रवृत्तौ व्यवहारलक्षणायां पाक्षिको वैकल्पिकोऽर्थलाभः कदाचित् स्यात् कदाचिन्नेत्यर्थः । निःसंशयो निःसंदेहः । तुः पुनरर्थः । अनर्थ उपघात आयत्यामेव । इदमुक्तं भवति । अन्यायप्रवृत्तिरेव तावदसंभविनी राजदण्डभयादिभिर्हेतुभिः प्रतिहतत्वात् । पठ्यते च ।

राजदण्डभयात्पापं नाचरत्यधमो जनः ।
परलोकभयान्मध्यः स्वभावादेव चोत्तमः ॥

---

१ D) ॰लक्षणविगमो ।

विरुद्धाः, तेभ्यः। बहुविरुद्धांल्लोकान् वर्जयित्वेत्यर्थः। असमानकुलशीलादित्वेऽपि हि परस्परं वैसादृश्यात्तथाविधनिर्व्रणसंबन्धभावेनासंतोषादिसंभवः। किं च। विभववैषम्ये सति कन्या महतः स्वपितुरैश्वर्यादल्पविभवं भर्तारमवगणयति। इतरोऽपि प्रचुरस्वपितृविभववशोत्पन्नाहङ्कारस्तत्पितुर्विभवविकलत्वेन दुर्बलपृष्ठोपष्टम्भां कन्यामवजानाति। तथा गोत्रजैर्वैवाह्ये स्वगोत्राचरितज्येष्ठकनिष्ठताव्यवहारलोपः स्यात्। तथाहि। ज्येष्ठोऽपि वयोविभवादिभिः कन्यापिता कनिष्ठस्यापि जामातृकपितुर्नीचैर्वृत्तिर्भवति। न च गोत्रजानां रूढं ज्येष्ठकनिष्ठव्यवहारमतिलङ्घ्यान्यो वैवाह्यव्यवहारो गुणं लभते, अपि तु तद्व्यवहारस्य प्रवृत्तौ गोत्रजेषु पूर्वप्रवृत्तविनयभङ्गान्महाननर्थ एव संपद्यते। तथा बहुविरुद्धैः सह संबन्धघटनायां स्वयमनपराधानामपि तत्संबन्धद्वारायातस्य महतो विरोधस्य भाजनभवनेनेहलोकपरलोकार्थयोः क्षतिः प्रसजति जनानुरागप्रभवत्वात् संपत्तीनामिति पर्यालोच्योक्तं "समानकुलशीलादिभिरगोत्रजैर्वैवाह्यमन्यत्र बहुविरुद्धेभ्यः" इति।

अत्र च लौकिकनीतिशास्त्रमिदम्। द्वादशवर्षा स्त्री षोडशवर्षः पुमान् तौ विवाहयोग्यौ। विवाहपूर्वो व्यवहारः कुटुम्बोत्पादनपरिपालनारूपश्चतुरो वर्णान् कुलीनान् करोति। युक्तितो वरणविधानमग्निदेवादिसाक्षिकं च पाणिग्रहणं विवाहः। स च ब्राह्मादिभेदादष्टधा। तथाहि। ब्राह्मो विवाहो यत्र वरायालंकृता कन्या प्रदीयते "त्वं भवास्य

## अनेकनिर्गमादिवर्जनम् ॥ २६ ॥

इति ॥ अनेके बहवो ये निर्गमा निर्गमद्वाराण्यादिशब्दात्प्रवेशद्वाराणि च, तेषां वर्जनमकरणम्। अनेकेषु हि निर्गमादिष्वनुपलक्ष्यमाणनिर्गमप्रवेशानां तथाविधलोकानामापाते सम्यग्गृहरक्षाभावेन स्त्र्यादिजनस्य विभवस्य च विप्लव एव स्यात्। निविडतरगृहद्वाररक्षयैव ते ऽनवकाशा भवन्ति। परिमितप्रवेशनिर्गमं च गृहं सुखरक्ष्यं भवतीति ॥

तथा।

## विभवाद्यनुरूपो वेषो विरुद्धत्यागेन ॥ २७ ॥

इति ॥ विभवादीनां वित्तवयोवस्थानिवासस्थानादीनामनुरूपो लोकपरिहासाद्यनास्पदतया योग्यो वेषो वस्त्रादिनेपथ्यलक्षणः विरुद्धस्य जङ्घार्धोद्घाटनशिरोवेष्टनाञ्चलदेशोर्ध्वमुखन्यसनात्यन्तगाढाङ्गिकालक्षणस्य विटचेष्टास्पष्टतानिमित्तस्य वेषस्यैव त्यागेनानासेवनेन। प्रसन्ननेपथ्यो हि पुमान्मङ्गलमूर्तिर्भवति मङ्गलाच्च श्रीसमुत्पत्तिः। यथोक्तम्।

श्रीर्मङ्गलात्प्रभवति प्रागल्भ्याच्च प्रवर्धते।
दाक्ष्यात्तु कुरुते मूलं संयमात्प्रतितिष्ठति ॥१॥

“मूलं” इत्यनुबन्धं “प्रतितिष्ठति” इति प्रतिष्ठां लभते ॥

तथा।

## आयोचितो व्ययः ॥ २८ ॥

इति ॥ आयस्य वृद्ध्यादिप्रयुक्तधनधान्याद्युपचयरूपस्योचि-

तच्चतुर्भागादितया योग्यो वित्तस्य व्ययो भर्तव्यभरणस्वभोगदेवातिथिपूजनादिप्रयोजनेषु विनियोजनम्। तथा च नीतिशास्त्रम्।

पादमायान्निधिं कुर्यात्पादं वित्ताय घट्टयेत्।
धर्मोपभोगयोः पादं पादं भर्तव्यपोषणे ॥१॥

तथा।

आयादर्धं नियुञ्जीत धर्मे समधिकं ततः।
शेषेण शेषं कुर्वीत यत्नतस्तुच्छमैहिकम् ॥१॥

आयानुचितो हि व्ययो रोग इव शरीरं कृशीकृत्य विभवसारमखिलव्यवहारासमर्थं पुरुषं करोति। पठ्यते च।

आयव्ययमनालोच्य यस्तु वैश्रवणायते।
अचिरेणैव कालेन सोऽत्र वैश्रवणायते ॥१॥

तथा।

## प्रसिद्धदेशाचारपालनम् ॥ २९ ॥

इति॥ प्रसिद्धस्य तथाविधापरशिष्टसंमततया दूरं रूढिमागतस्य देशाचारस्य सकलमण्डलव्यवहाररूपस्य भोजनाच्छादनादिचित्रक्रियात्मकस्य पालनमनुवर्तनम्। अन्यथा तदाचारातिलङ्घने तद्देशवासिजनतया सह विरोधसंभवेनाकल्याणलाभः स्यादिति। पठन्ति चात्र लौकिकाः।

यद्यपि सकलां योगी छिद्रां पश्यति मेदिनीम्।
तथापि लौकिकाचारं मनसापि न लङ्घयेत् ॥१॥ इति

तथा।

रेण यथावत्स्वरूपनिश्चयः[१]। स्वगौरवरक्षा स्वेनात्मना गौरवं पुरस्करणं स्वगौरवं ; तस्य रक्षा निवारणम्। ततो ज्ञानं च स्वगौरवरक्षा च ज्ञानस्वगौरवरक्षे कर्तव्ये। गर्ह्यो ह्यर्थः सम्यग्ज्ञातव्यः प्रथमतस्ततोऽनुमतिदोषपरिहाराय सर्वप्रकारैर्न पुरस्कारस्तस्य कर्तव्य इति ॥

तथा।

## देवातिथिदीनप्रतिपत्तिः ॥ ४२ ॥

इति ॥ दीव्यते स्तूयते भक्तिभरनिर्भरामरप्रभुप्रभृतिभिर्भव्यैरनवरतमिति देवः। स च क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः। तस्यैवैतानि नामानि। अर्हन्नजोऽनन्तः शम्भुर्बुद्धस्तमोन्तक इति ॥ न विद्यते सततप्रवृत्तातिविशदैकाकारानुष्ठानतया तिथ्यादिदिनविभागो येषां, तेऽतिथयः। यथोक्तम्।

तिथिः पर्वोत्सवाः सर्वे त्यक्ता येन महात्मना।
अतिथिं तं विजानीयाच्छेषमभ्यागतं विदुः ॥१॥

१ Here P inserts a passage which is wanting in the MSS. इदमित्थमिदमित्थं न वेति परस्परविरुद्धार्थतया द्विविधं ज्ञानं संशयः, यथाहमात्मा किं वा शरीरमित्यादि। इदमित्थमेवेति वस्तुस्वरूपाद्विरुद्धतयैकरूपं ज्ञानं विपर्ययः, यथाहं शरीरमेवेत्यादि। इदं किमप्यस्तीति निर्धाररहितविचारणात्मनध्यवसायः, यथाहं कोऽप्यस्मीत्यादि। and omits स्वगौरवरक्षा स्वेनात्मना गौरवं पुरस्करणं।

